संस्कृतव्याकरण

क्र. नं. ५६

४८/व्या २०

भट्टोजी — सिद्धान्तकौमुदी

क्रमांक ....... २०

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

३

(1)

श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥ श्रीगुरुचरणारविंदाभ्यांनमः॥ श्रीसांबायनमः॥श्रीगजाननायनमः॥
मुनित्रयंनमस्कृत्यतदुक्तीःपरिभाव्यच॥ वैयाकरणसिद्धांतकौमुदीयंविरच्यते॥१॥ अइउण्॥ ऋऌक्॥ एओ
ङ्॥ ऐऔच्॥ हयवरट्॥ लण्॥ ञमङणनम्॥ झभञ्॥ घढधष्॥ जबगडदश्॥ खफछठथचटतव्॥ कपय्॥ शषस
र्॥ हल्॥ इतिमाहेश्वराणिसूत्राण्यणादिसंज्ञार्थानि॥ एषामंत्याइतः॥ लण्सूत्रेअकारश्च॥ हकारादिष्वकारउच्चार
णार्थः॥ हलंत्यं॥ हलितिसूत्रेंत्यमित्स्यात्॥ आदिरंत्येनसहेता॥ अंत्येनेतासहितआदिर्मध्यगानांस्वस्यचसंज्ञास्यात्॥ इ
तिहल्संज्ञायांसत्यां॥ हलंत्यं॥ उपदेशेंत्यंहलित्स्यात्॥ उपदेशआद्योच्चारणं॥ ततोऽण्अच्इत्यादिसंज्ञासिद्धौ॥ उपदेशे
जनुनासिकइत्॥ उपदेशेऽनुनासिकोजित्संज्ञःस्यात्॥ प्रतिज्ञानुनासिक्याःपाणिनीयाः॥ लण्सूत्रस्थावर्णेनसहो
च्चार्यमाणोरेफोरलयोःसंज्ञा॥ प्रत्याहारेष्वितांनग्रहणं॥ अनुनासिकइत्यादिनिर्देशात्॥ नह्यत्रककारेपरेऽच्कार्यं
दृश्यते॥ आदिरंत्येनेत्येतत्सूत्रेणकृताःसंज्ञाःप्रत्याहारशब्देनव्यवह्रियंते॥ ऊकालोज्झ्रस्वदीर्घप्लुतः॥ उश्चऊश्चऊ३श्च
वः॥ वांकालइवकालोयस्यसोच्क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञःस्यात्॥ सप्रत्येकमुदात्तादिभेदेनत्रिधा॥ उच्चैरुदात्तः॥ ता
ल्वादिषुसभागेषुस्थानेषूर्ध्वभागेनिष्पन्नोजुदात्तसंज्ञःस्यात्॥ आयेतन्वंति॥ नीचैरनुदात्तः॥ स्पष्टं॥ अर्वाङ्॥ समा
हारस्वरितः॥ उदात्तानुदात्तत्वेवर्णधर्मौसमाह्रियेतेयस्मिन्सोच्स्वरितसंज्ञःस्यात्॥ तस्यादितउदात्तमर्धह्रस्वं॥

शिव

(1A)

ह्रस्वग्रहणमतंत्रं ॥ स्वरितस्यादितोर्धमुदात्तं बोध्यं ॥ उत्तरार्धंतु परिशेषादनुदात्तं ॥ तस्य चोदात्तस्वरितपरत्वे श्रवणं
स्पष्टं ॥ अन्यत्र तु उदात्तश्रुतिः ॥ प्रातिशाख्ये प्रसिद्ध ॥ क१वोश्वः ॥ रथानां नये ३ राः ॥ शंनश्चक्रंयो ३ ह्योवर्तनिः ॥ इत्यादि
ष्वनुदात्तश्रुतिः ॥ अग्निमीळे इत्यादावुदात्तश्रुतिः ॥ स नवविधोपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा ॥ मुख
नासिकावचनोनुनासिकः ॥ मुखसहितनासिकयोच्चार्यमाणो वर्णोनुनासिकसंज्ञः स्यात् ॥ तदित्थं ॥ अइउऋ एषां
वर्णानां प्रत्येकमष्टादश भेदाः ॥ ऌवर्णस्य द्वादश ॥ तस्य दीर्घाभावात् ॥ एचामपि द्वादश ॥ तेषां ह्रस्वाभावात् ॥ तुल्यास्य
प्रयत्नं सवर्णं ॥ ताल्वादिस्थानमाभ्यंतरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् ॥ अकुहविसर्जनी
यानां कंठः ॥ इचुयशानां तालु ॥ ऋटुरषाणां मूर्धा ॥ ऌतुलसानां दंताः ॥ उपूपध्मानीयानामोष्ठौ ॥ ञमङणनानां नासि
का च ॥ एदैतोः कंठतालु ॥ ओदौतोः कंठोष्ठं ॥ वकारस्य दंतोष्ठं ॥ जिह्वामूलीयस्य जिह्वामूलं ॥ नासिकानुस्वारस्य ॥ ॥ इति स्थानानि
यत्नो द्विधा आभ्यंतरो बाह्यश्च ॥ आद्यश्चतुर्धा ॥ स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात् ॥ तत्र स्पृष्टं प्रयतनं स्पर्शानां ॥ ई
षत्स्पृष्टमंतःस्थानां ॥ विवृतमूष्मणां स्वराणां च ॥ ह्रस्वस्यावर्णस्य प्रयोगे संवृतं ॥ प्रक्रियादशायां तु विवृतमेव ॥ ए
तच्च सूत्रकारेण ज्ञापितं ॥ तथाहि ॥ अ अ इति ॥ विवृतं अनूद्य संवृतोनेन विधीयते ॥ अस्य चाष्टाध्यायीं संपूर्णां प्रत्य
सिद्धत्वाच्छास्त्रदृष्ट्या विवृतत्वमस्त्येव ॥ तथा च सूत्रं ॥ पूर्वत्रासिद्धं ॥ अधिकारोयं ॥ तेन सपादसप्ताध्यायीं प्रति त्रि

सि·कौ·दी॥
॥२

(2)

पाद्यसिद्धा त्रिधा धामपि पूर्वं प्रतिपरं र[illegible]त्वमसिद्धं॥ बाह्यप्रयत्नस्त्वेकादशधा॥ विवारः संवारः श्वासो नादो घोषोऽघोषोऽ
ल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति॥ खयां यमाः खयः ᳲकᳲपौ विसर्गः शर एव च॥ एते श्वासानुप्रदाना अघोषा
श्च विवृण्वते॥१॥ कंठमन्ये तु घोषास्युः संवृता नादभागिनः॥ अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः॥२॥ वर्गेष्वा
द्यानां चतुर्णां पंचमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः॥ पलिक्नीः॥ चख्नतुः॥ अग्ग्निः॥ घ्
घ्नंतीत्यत्र क्रमेण कखगघेभ्यः परे तत्सदृशा एव यमाः॥ तत्र वर्गाणां प्रथमद्वितीयाः खयः॥ तथा तेषामेव यमाः॥ जिह्वा
मूलीयोपध्मानीयौ विसर्गः शषसहाश्चेत्येतेषां विवारः श्वासोऽघोषश्च॥ अन्येषां तु संवारो नादो घोषश्च॥ वर्गाणां
प्रथमतृतीयपंचमाः प्रथमतृतीययमौ यरलवाश्चाल्पप्राणाः॥ अन्ये महाप्राणा इत्यर्थः॥ बाह्यप्रयत्नाश्च यद्यपि सव
र्णसंज्ञायामनुपयुक्तास्तथाप्यांतरतम्यपरीक्षायामुपयोक्ष्यंत इति बोध्यं॥ कादयो मावसानाः स्पर्शाः॥ यरलवा अंतस्थाः॥
शषसहा ऊष्माणः॥ अचः स्वराः॥ ᳲक ᳲप इति कपाभ्यां प्रागर्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ॥ अं अः इ
त्यचः परावनुस्वारविसर्गौ॥ इति प्रयत्नविवेकः॥ ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यं॥ अकारहकारयोरिकारशकारयो
ऋकारषकारयोर्लृकारसकारयोश्च सावर्ण्ये प्राप्ते॥ नाज्झलौ॥ आकारसहितोऽच् आच् स च हल् चेत्येतौ मिथः
सवर्णौ न स्तः॥ तेन दधीत्यस्य हरति शीतलं षष्ठं सांद्रमित्येतेषु परेषु यणादिकं न॥ अन्यथा दीर्घादीनामिव हकारादी शिव

The Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao ... Pratishthan ...

नामपि ग्रहणकशास्त्रबलाद् चुत्वं स्यात् ॥ तथा हि ॥ अणुदित्सवर्णस्य चाप्रत्ययः ॥ प्रतीयन्तेऽवधीयन्ते इति प्रत्ययः ॥ अ
विधीयमानोऽण् उदिच्च सवर्णस्य संज्ञा स्यात् ॥ अत्राण् परेण णकारेण ॥ कु चु टु तु पु एते उदितः ॥ तदेवम् अष्टादशानां सं
ज्ञा ॥ तथेकारोकारौ ॥ ऋकारस्त्रिंशतः ॥ एवं लृकारोऽपि ॥ एचो द्वादशानां ॥ एदैतोरोदौतोश्च न मिथः सावर्ण्यं ॥ ऐऔ
(2A) जिति सूत्रारंभसामर्थ्यात् ॥ तेनैचश्चतुर्विंशतेः संज्ञा स्यादिति नापादनीयं ॥ नाज्झलौ ॥ इति निषेधो यद्यप्याक्षरसमाम्ना
यिकानामेव तथापि हकारस्य आकारेण सवर्णः ॥ तत्राप्याकारस्य प्रश्लिष्टत्वात् ॥ तेन विश्वपाभिरित्यत्र हो ढ इति ढत्वं
न भवति ॥ अनुनासिकाननुनासिकभेदेन यवला द्विधा ॥ तेनाननुनासिकास्ते द्वयोर्द्वयोः संज्ञा ॥ तपरस्तत्कालस्य ॥ तः परो
यस्मात् स च तात् परश्च उच्चार्यमाणसमकालस्यैव संज्ञा स्यात् ॥ तेन अत् इत् उत् इत्यादयः षण्णां षण्णां संज्ञा ॥ ऋदिति द्वाद
नां शौं ॥ वृद्धिरादैच् ॥ आत् ऐच्च वृद्धिसंज्ञः स्यात् ॥ अदेङ्गुणः ॥ अत् एङ् च गुणसंज्ञः स्यात् ॥ भूवादयो धातवः ॥ क्रिया
वाचिनो भ्वादयो धातुसंज्ञाः स्युः ॥ प्राग्रीश्वरान्निपाताः ॥ अधिकारोऽयं ॥ चादयोऽसत्वे ॥ अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः
प्रादयः ॥ अद्रव्यार्थाः प्रादयस्तथा ॥ उपसर्गाः क्रियायोगे ॥ गतिश्च ॥ प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः गतिसंज्ञाश्च
स्युः ॥ प्र ॥ परा ॥ अप ॥ सम् ॥ अनु ॥ अव ॥ निस् ॥ निर् ॥ दुस् ॥ दुर् ॥ वि ॥ आङ् ॥ नि ॥ अधि ॥ अपि ॥ अति ॥ सु ॥ उत् ॥
अभि ॥ प्रति ॥ परि ॥ उप ॥ एते प्रादयः ॥ न वेति विभाषा ॥ निषेधविकल्पयोर्विभाषासंज्ञा स्यात् ॥ स्वं रूपं शब्दस्याश

सि॰कौ॰टी॰॥

॥३॥

(3)

७५४

ब्दसंज्ञा॥ शब्दस्य स्वं रूपं संज्ञि शब्दशास्त्रे या संज्ञा तां विना॥ येन विधिस्तदंतस्य॥ विशेषणं तदंतस्य संज्ञा स्यात् स्वस्य च रूपस्य
समासप्रत्ययविधौ प्रतिषेधः॥ उगिद्वर्णग्रहणवर्जं॥ विरामोवसानं॥ वर्णानामभावोऽवसानसंज्ञः स्यात्॥ परः सन्निकर्षः संहि
ता॥ वर्णानामतिशयितः संनिधिः संहितासंज्ञः स्यात्॥ सुप्तिङंतं पदं॥ सुबंतं तिङंतं च पदसंज्ञं स्यात्॥ हलोनंतराः संयो
गः॥ अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः॥ ह्रस्वं लघु॥ संयोगे गुरु॥ संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात्॥ दीर्घं च॥ गुरु
स्यात्॥ ॥ ॥ इति संज्ञाप्रकरणं॥ ॥ ॥ इको गुणवृद्धी॥ गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते
तत्र इक इति षष्ठ्यंतं पदमुपतिष्ठते॥ अचश्च॥ ह्रस्वदीर्घप्लुतशब्दैर्यत्राच् विधीयते तत्र अच इति षष्ठ्यंतं पदमुपतिष्ठते॥ आ
द्यंतौ टकितौ॥ टित्कितौ यस्योक्तौ तस्य क्रमादाद्यंतावयवौ स्तः॥ मिदचोंत्यात्परः॥ अचतिनि धरिणे षष्ठी॥ अचां मध्ये योंत्यः
स्तस्मात्परस्तस्यैवांतावयवो मित्स्यात्॥ षष्ठी स्थानेयोगा॥ अनिर्धारितसंबंधविशेषा षष्ठी स्थानेयोगा बोध्या॥ स्थानं च प्रसंगः॥
स्थानेंतरतमः॥ प्रसंगे सति सदृशतम आदेशः स्यात्॥ यत्रानेकविधमांतरं तत्र स्थानत आंतर्यं बलीयः॥ तस्मिन्निति निर्दिष्टे पू
र्वस्य॥ सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णांतरेणाव्यवहितस्य पूर्वस्य ज्ञेयं॥ तस्मादित्युत्तरस्य॥ पंचमीनिर्देशेन विधी
यमानं कार्यं वर्णांतरेणाव्यवहितस्य परस्य बोध्यं॥ अलोंत्यस्य॥ षष्ठीनिर्दिष्टस्यांत्यस्यादेशः स्यात्॥ ङिच्च॥ अयमप्यंत्यस्या
त्सर्वस्येत्यपवादः॥ आदेः परस्य॥ परस्य यद्विहितं तत्तस्यादेर्बोध्यं॥ अलोंत्यसूत्रापवादः॥ अनेकाल्शित्सर्वस्य॥ स्पष्टं॥ अ

शिव

स

श्रीरामप्रसन्न

॥३॥

(3A)

लोपस्सूत्रापवादः॥ अष्टाभ्य औश् इत्यादौ आदेः परस्येत्येतदपि परत्वादनेन बाध्यते॥ स्वरितेनाधिकारः॥ स्वरितत्वयुक्तं श
ब्दस्वरूपमधिकृतं बोध्यं॥ परनित्यांतरंगापवादानामुत्तरोत्तरं बलीयः॥ असिद्धं बहिरंगमंतरंगे॥ अंतरंगे कार्ये कर्तव्ये बहिरं
गकार्यमसिद्धं॥ अकृतव्यूहाः पाणिनीयाः॥ निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वंतीत्यर्थः॥ श्री ॥ ॐ॥ इति
परिभाषाप्रकरणं॥ ॐ॥ श्री॥ ॥ इको यणचि॥ इकः स्थाने यण् स्यात् अचि संहितायां विषये॥ सुधी उपास्य इति स्थिते॥ स्था
नतांतर्या ईकारस्य यकारः॥ सुध्य् उपास्य इति स्थिते॥ अनचि च॥ अचः परस्य यरो द्वे वास्तो न त्वचि॥ इति धकारद्वित्वं॥ स्य
स्थानिवदादेशोऽनल्विधौ॥ आदेशः स्थानिवत्स्यान्न तु स्थान्यलाश्रयविधौ॥ अनेनेह यकारस्य स्थानिवद्भावेनाच्त्वमाश्रित्य
नचि चेति द्वित्वनिषेधो न शंक्यः॥ अनल्विधाविति तन्निषेधात्॥ अचः परस्मिन्पूर्वविधौ॥ अल्विध्यर्थमिदं॥ परनिमित्तो
ऽजादेशः स्थानिवत्स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये॥ इति यणः स्थानिवद्भावे प्राप्ते॥ न पदांतद्विर्वचनवरेयलो
पस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु॥ पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परनिमित्तोऽजादेशो न स्थानिवत्॥ इति स्या[illegible] ९
स्थानिवद्भावनिषेधः॥ झलां जश् झशि॥ स्पष्टं॥ इति धकारस्य दकारः॥ अदर्शनं लोपः॥ प्रसक्तस्यादर्शनं लोपसंज्ञं
स्यात्॥ संयोगांतस्य लोपः॥ संयोगांतं यत्पदं तदंतस्य लोपः स्यात्॥ इति यलोपे प्राप्ते॥ यणो मयो द्वे वाच्ये॥ मय इति पंचमी यण
इति षष्ठीति पक्षे यकारस्य द्वित्वं॥ तदिह यकारधकारयोर्द्वित्वविकल्पाच्चत्वारि रूपाणि॥ एकधमेकयं॥ एकधं द्वियं॥ द्विधमे

यणः प्रतिषेधो वाच्यः॥२

कर्ध्यं॥ हृद्यं॥ सुध्युपास्यः॥ मध्वरिः॥ धात्त्रंशः॥ लाकृतिः॥ नादिन्याक्रोशे पुत्रस्य॥ पुत्रशब्दस्य न द्वे स्तः आदिनीशब्दे प
रे आक्रोशे गम्ये॥ पुत्रादिनी त्वमसि पापे॥ आक्रोशे किं॥ तत्त्वकथने द्विर्वचनं भवत्येव॥ तत्परे च॥ पुत्रपुत्रादिनी त्वमसि पापे॥
वा हतजग्धयोः॥ पुत्रहती॥ पुत्त्रहती॥ पुत्रजग्धी॥ पुत्त्रजग्धी॥ त्रिप्रभृतिषु शाकटायनस्य॥ त्र्यादिषु वर्णेषु संयुक्तेषु वा द्वि
त्वं॥ इंद्रः॥ इंन्न्द्रः॥ राष्ट्रं॥ राष्ट्र्रं॥ सर्वत्र शाकल्यस्य॥ द्वित्वं न॥ अर्कः॥ ब्रह्मा॥ दीर्घादाचार्याणां॥ दात्रं॥ पात्त्रं॥ अचो रह— द्वित्वन्न
भ्यां द्वे॥ अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः॥ अनचि चेति प्राप्तं रेफस्य द्वित्वं तत्र को द्विष्यं न्यायेन वा ध्वनि॥
हर्यनुभवः॥ हर्य्यनुभवः॥ नह्यस्ति॥ नह्य्यस्ति॥ हलो यमां यमि लोपः॥ हलः परस्य यमो लोपः स्याद्वा यमि॥ इति यलोपप
क्षे द्वित्वाभावपक्षे चैकयंरूपं तुल्यं॥ लोपारंभफलं तु आदित्यो देवता यस्य सा दित्यं हविः॥ यमां यमीति यथासंख्यविज्ञा
नं नेह॥ माहात्म्यं॥ एचोयवायावः॥ एचः क्रमाद् य् अव् आय् आव् एते स्युरचि॥ तस्य लोपः॥ तस्येतो लोपः स्यात्॥ इति
यवयोर्लोपो न॥ उच्चारणसामर्थ्यादिवं चेत्संज्ञापीह न भवति॥ हरये॥ विष्णवे॥ नायकः॥ पावकः॥ वांतो यि प्रत्यये॥ यकारा द्विव
दौ प्रत्यये परे ओदौतोरवावौ स्तः॥ गोर्विकारो गव्यं॥ गोपयसोर्यत्॥ नावा तार्यं नाव्यं॥ नौवयोधर्म... इत्यादिना यत्॥ गो
यूतौ छंदस्युपसंख्यानं॥ अध्वपरिमाणे च॥ अध्वपरिमाणे गम्यमाने ओदौतोरवावौ स्तः॥ गव्यूतिः॥ ऊतियूतीत्यादिना श्रीरामप्र
यूतिशब्दो निपातितः॥ वांतइत्यत्र वकारात्प्राक् तावित्यत्र छकाराद्वा पूर्वभागे लोपो व्योरिति लोपेन वकारः प्रश्लिष्यते॥

(5A)

तेन ऋूय माणवकारांतादेशः स्यात्॥ वकारो न लुप्यत इति यावत्॥ धातोस्तन्निमित्तस्यैव॥ यादौ प्रत्यये परे धातोरेचश्चेद्रूं तादे
न्रास्तर्हि तन्निमित्तस्यैव नान्यस्य॥ लव्यं॥ अवश्यलाव्यं॥ तन्निमित्तस्यैवेति किं॥ ओ यते॥ औयत॥ क्षय्यजय्यौ न्रूक्यार्थे॥ यां
तादेन्रा निपात्यते नार्थभिदे॥ क्षेतुं न्राक्यं क्षय्यं॥ जेतुं न्राक्यं जय्यं॥ क्षेतुं जेतुं योग्यं क्षेयं जेयं पापं मनः॥ क्रय्यस्तदर्थे॥ तस्मै प्रसूस
र्थायेदं तदर्थं॥ क्रेतारः क्रीणीयुरिति बुध्या आपणे प्रसारितं क्रय्यं॥ क्रयमन्यत्॥ क्रयणार्हमित्यर्थः॥ लोपः न्राकल्यस्य॥ अव
र्णपूर्वयोः पदांतयोर्यवयोर्लोपो वा न्रि परे॥ पूर्वत्रासिद्धमिति लोपन्रास्त्रस्यासिद्धत्वान्न स्वरसंधिः॥ हर एहि॥ हरयेहि॥ विष्णव
ह॥ विष्णविह॥ श्रियाउपतः॥ श्रियायुपतः॥ गुराउक्तः॥ गुरायुक्तः॥ कानि संति कौ स्त इत्यत्रास्तेः श्नसोरल्लोपस्य स्थानिव
त्वेन यणावादेशौ प्राप्तौ न पदांतेति सूत्रेण पदांतविधौ तन्निषेधान्न स्तः॥ एकः पूर्वपरयोरित्यधिकृत्य॥ आद्गुणः॥ अवर्णादचि
परे पूर्वपरयोरेको गुणादेशः स्यात्संहितायां॥ उपेंद्रः॥ उमेशः॥ गंगोदकं॥ उरण्रपरः॥ ऋ इति त्रिंशतः संज्ञेत्युक्तं तत्स्थाने यो
ण् स रपरः सन्नेव प्रवर्तते॥ तत्रांतरतम्यात् कृष्णर्द्धिरित्यत्रार्तवल्कार इत्सन्नाल्ल॥ अचो रहाभ्यां द्वे इति पक्षे द्वित्वं॥ झरो
झरि सवर्णे॥ हलः परस्य झरो लोपो वा स्यात् सवर्णे झरि॥ द्वित्वाभावे लोपे च सति एकधं॥ असति लोपे द्वित्वे लोपयोर्वा
द्विधं॥ सति द्वित्वे लोपे चासति त्रिधं॥ कृष्णर्द्धिः॥ यणः प्रतिषेधो वाच्यः इति पंचमी मय इति षष्ठीति पक्षे ककारस्यापि द्वित्वं॥ तस्य त्वनाचि
त्वेति॥ तेन तवल्कार इत्यत्र रूपचतुष्टयं॥ द्वित्वं लस्यैव नोभयोरुभयोरपि॥ तवल्कारारित्युबुधैर्बोध्यं रूपचतुष्टयं॥३॥ त

वल्कारः॥ वृद्धिरेचि॥ आदेचि परे वृद्धिरेकादेशः स्यात्॥ गुणापवादः॥ कृष्णैकत्वं॥ गंगौघः॥ देवैश्वर्यं॥ कृष्णौत्कंठ्यं॥
एत्येधत्यूठ्सु॥ अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्॥ पररूपगुणापवादः॥ उपैति॥ उपैधते॥ प्र
ष्ठौहः॥ एजाद्योरिति किं॥ उपेतः॥ माभवान्प्रेदिधत्॥ पुरस्तादपवादन्यायेनेयं वृद्धिरेङि पररूपस्यैव बाधिका न तु ओ
माङोश्चेत्यस्य॥ तेनावेहीत्यत्र वृद्धिरसाधुरेव॥ अक्षादूहिन्यामुपसंख्यानं॥ अक्षौहिणी सेना॥ स्वादीरेरिणोः॥ स्वैरः॥ स्वै
रमीरितुं शीलमस्येति स्वैरी॥ स्वैरिणी॥ प्रादूहोढोढ्येषैष्येषु॥ प्रौहः॥ प्रौढः॥ अर्थवद्ग्रहणेनानर्थकस्य॥ तेनवुढ
ग्रहणे क्तांतमेव गृह्यते॥ न तु क्तवत्वंतं केदेशः॥ प्रौढवान्॥ प्रौढिः॥ इष इच्छायां तुदादिः॥ इष गतौ दिवादिः॥ इष आ
भीक्ष्ण्ये क्र्यादिः॥ एषां घञि ण्यति च एषः एष्यः॥ तत्र पररूपे प्राप्ते अनेन वृद्धिः॥ प्रैषः॥ प्रैष्यः॥ यस्तु ईष उंछे॥ यश्च ईष
गतिहिंसादर्शनेषु तयोर्दीर्घोपधत्वादीषः ईष्यः॥ तत्र आद्गुणः प्रेषः॥ प्रेष्यः॥ ऋते च तृतीयासमासे॥ सुखेन ऋतः
सुखार्तः॥ तृतीयेति किं॥ परमर्तः॥ प्रवत्सतरकंबलवसनार्णदशानामृणे॥ प्रार्णं॥ वत्सतरार्णमित्यादि॥ ऋण
स्यापनयनाय यदन्यदृणं क्रियते तदृणार्णं॥ दशार्णो देशः॥ नदी च दशार्णा॥ ऋणशब्दो दुर्गभूमौ जले च॥
उपसर्गादृति धातौ॥ अवर्णांतादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात्॥ उपार्छति॥ प्रार्छति॥ अंतादि
वच्च॥ योयमेकादेशः पूर्वस्यांतवत्परस्यादिवत्स्यात्॥ ऽतिरेफस्य पदांतत्वे॥ खरवसानयोर्विसर्जनीयः॥ खरि

पुरस्तादपवादाः अनंतरान्विधीन्बाधंते नोत्तरान्॥

न

(5)

शिव

॥५॥

(5A)

अवसाने च परे रेफस्य विसर्जनीयः स्यात्पदांते ॥ इति विसर्गे प्राप्ते ॥ अंतवद्भावेन पदांतस्य न विसर्गः ॥ उभयथर्क्षु कर्तरि
चर्षिदेवतयोरित्यादि निर्देशात् ॥ उपसर्गे णेद धातो राक्षेपे क्षिपधे धातावितियोगे पुनर्विधानार्थं ॥ तेन ऋसकइति विभागेन २
पाक्षिकोपि प्रकृतिभावोऽत्र न भवति ॥ वा सुप्यापिशलेः ॥ अवर्णांतादुपसर्गादृकारादौ सुब्धातौ परे वृद्धिर्वा स्यात् ॥
आपिशलिग्रहणं पूजार्थं ॥ प्रार्षभीयति ॥ प्रर्षभीयति ॥ सावर्ण्यात् ऌवर्णस्य ग्रहणं ॥ प्राल्कारीयति ॥ प्रल्कारीयति ॥
सपरत्वाद्दीर्घेण ॥ उपऋकारीयति ॥ उपकारीयति ॥ एङि पररूपं ॥ आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः
स्यात् ॥ प्रेजते ॥ उपोषति ॥ इह वा सुप्यापिशलेरित्यनुवर्त्य वाक्यभेदेन व्याख्येयं ॥ तेन एङादौ सुब्धातौ वा ॥ उपेडकीयति ॥ उपैडकी
यति ॥ प्रोघीयति ॥ प्रौघीयति ॥ एवे चानियोगे ॥ नियोगोऽवधारणं ॥ क्वेव भोक्ष्यसे ॥ अनवक्लृप्तावेवशब्दः ॥ अनियोगे किं ॥
तवैव ॥ अचोंत्यादि टि ॥ अचां मध्ये योंत्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् ॥ शकंध्वादिषु पररूपं वाच्यं ॥ तच्च टेः ॥ शकंधुः ॥
कर्कंधुः ॥ कुलटा ॥ सीमंतः केशवेशे ॥ सीमांतोन्यः ॥ मनीषा ॥ हलीषा ॥ लांगलीषा ॥ पतंजलिः ॥ सारंगः पशुपक्षि
णोः ॥ सारंगोन्यः ॥ आकृतिगणोयं ॥ मार्तंडः ॥ ओत्वोष्ठयोः समासे वा ॥ स्थूलोतुः ॥ स्थूलौतुः ॥ बिंबोष्ठः ॥ बिंबौष्ठः ॥ स
मासे किं ॥ तवौष्ठः ॥ ओमाङोश्च ॥ ओमि आङि चात्परे पररूपमेकादेशः स्यात् ॥ शिवायों नमः ॥ शिव एहि ॥ शिवेहि ॥
अव्यक्तानुकरणस्यात इतौ ॥ ध्वनेरनुकरणस्य योऽच्छब्दस्तस्मादितौ परे पररूपमेकादेशः स्यात् ॥ पटत् इति ॥ पट

(6)

ति॥ एकाचो न॥ श्रदिति॥ नाम्रेडितस्यांत्यस्य तु वा॥ आम्रेडितस्य प्रागुक्तं न स्यात् अंत्यस्य तु तकारमात्रस्य वा स्यात्॥ डाचि
बहुलं द्वे भवत इति बहुलवचनात् द्वित्वं॥ तस्य परमाम्रेडितं॥ द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यात्॥ पटत्पटेति॥ झलां
जशोंते॥ पदांते झलां जशः स्युः॥ पटत्पटदिति॥ अकः सवर्णे दीर्घः॥ अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्॥ दैत्यारिः
श्रीशः॥ विष्णूदयः॥ अचि किं॥ कुमारी शेते॥ नाज्झलाविति सावर्ण्यनिषेधस्तु न दीर्घईकारयोः॥ ग्रहणकशास्त्रस्य
सावर्ण्यविधिनिषेधाभ्यां प्रागनिष्पत्तेः॥ अकः किं॥ हरये॥ ऋति सवर्णे ऋ वा॥ होतृकारः॥ होतृकारः॥ लृति सवर्णे लृ
वा॥ होतॢकारः॥ पक्षे ऋकारः सावर्ण्यात्॥ होतृकारः॥ ऋति ऋ वा लृति लृ वेत्युभयत्रापि विधेयं वर्णद्वयं द्विमात्रं॥ पं
आद्यस्य मध्ये द्वौ रेफौ तयोरेका मात्रा॥ अभितोऽज्भक्तिरपरा॥ द्वितीयस्य तु मध्ये द्वौ लकारौ॥ शेषं प्रागवत्॥ इहोभय
त्रापि ऋ सकृदिति पाक्षिकः प्रकृतिभावो वक्ष्यते॥ एङः पदांतादति॥ पदांतादेङोऽति परे पूर्वरूपमेकादेशः स्यात्॥ हरेऽव॥
विष्णोऽव॥ सर्वत्र विभाषा गोः॥ लोके वेदे चैङंतस्य गोरति वा प्रकृतिभावः स्यात् पदांते॥ गो अग्रं॥ गोऽग्रं॥ पदांते किं॥
गोः॥ एङंतस्य किं॥ चित्रग्वग्रं॥ अवङ् स्फोटायनस्य॥ अतीति निवृत्तं॥ अचि परे पदांते गोरवङ् वा स्यात्॥ गवाग्रं॥ शिव
पदांते किं॥ गवि॥ ~~[illegible]~~॥ व्यवस्थितविभाषया गवाक्षः॥ इंद्रे च॥
गोरवङ् स्यादिंद्रे॥ गवेंद्रः॥ अथ प्रकृतिभावः॥ प्लुतप्रगृह्या अचि नित्यं॥ प्लुताः प्रगृह्याश्च वक्ष्यंते तेऽचि नित्यं प्रकृत्या

(6A)

[illegible]

स्तु॥ एहि कृष्ण ३ अत्र गौश्चरति॥ हरी एतौ॥ निसमिति किं॥ हरी एतौ विषयादौ वयमेव प्रकृतिभावो यथा स्यात्॥ इकोऽसवर्णे इ
ति ह्रस्वसमुच्चितो मा भूत्॥ इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च॥ पदान्ता इकोऽसवर्णेऽचि परे प्रकृत्या स्युर्ह्रस्वश्च वा॥ अत्र ह्रस्वविधि
सामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो न कर्तव्य इति भाष्ये स्थितं॥ चक्रि अत्र॥ चक्र्यत्र॥ पदान्ता इति किं॥ गौर्यौ॥
न समासे॥ वाप्यश्वः॥ सिति च॥ पार्श्वं॥ ऋत्यकः॥ ऋति परेऽकः प्राग्वत्॥ ब्रह्म ऋषिः॥ ब्रह्मर्षिः॥ पदान्ता इत्येव॥ आर्छत्॥
समासेऽप्ययं प्रकृतिभावः॥ सप्तऋणां॥ वाक्यस्य टेः प्लुत उदात्तः॥ इत्यधिकृत्य॥ प्रत्यभिवादेऽशूद्रे॥ अशूद्रविषये प्रत्यभिवादे यद्वा
क्यं तस्य टेः प्लुतः स्यात्॥ अभिवादये देवदत्तोऽहं॥ भो आयुष्मानेधि देवदत्ता ३॥ स्त्रियां न॥ अभिवादये गार्ग्यहं॥ भो आयुष्म
ती भव गार्गि॥ नाम गोत्रं वा यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्र प्लुत इष्यते॥ नेह॥ आयुष्मानेधि॥ भो राजन्य विशां वेति वाच्यं॥
आयुष्मानेधि भो ३॥ आयुष्मानेधीन्द्रवर्म ३ न्॥ आयुष्मानेधीन्द्रपालिता ३॥ दूराद्धूते च॥ दूरात्संबोधने यद्वाक्यं तस्य टेः प्लुतः
स्यात्॥ सक्तून् पिब देवदत्ता ३ ओं॥ हे ३ राम॥ रामहे ३॥ गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचां॥ दूरात्संबोधने यद्वाक्यं तस्य ऋदि
त्रस्यानंत्यस्य गुरोर्वा प्लुतः स्यात्॥ एहि दे ३ वदत्त॥ देवदा ३ त्त॥ देवदत्त ३॥ गुरोः किं॥ वकारादकारस्य मा भूत्॥ अनृतः किं॥
कृष्ण ३॥ एकैकग्रहणं पर्यायार्थं॥ ऋह प्राचामिति योगो विभज्यते॥ तेन सर्वः प्लुतो विकल्प्यते॥ अप्लुतवदुपस्थिते॥ उपस्थि
तोऽनार्ष इति शब्दः तस्मिन्परे प्लुतोऽप्लुतवद्भवति॥ अप्लुतकार्यं यणादिकं करोतीत्यर्थः॥ सुश्लोका ३ इति॥ सुश्लोकेति॥

॥ हैहेप्रयोगे हैहयोः॥ एतयोः प्रयोगे दूराद्धूते यद्वाक्यं तत्र हैहयोरेव प्लुतः॥ + ४

वार्त्तिकं ॥ अप्लुतवदुपस्थिते ॥ अप्लुत एव विधीयेत प्लुतश्च निषिध्येत ॥ तथा च प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात् ॥ अग्नी३
इति ॥ ईचाक्रवर्मणस्य ॥ ईदूतौ च पूर्वं प्लुतवत् ॥ चिनुही३ इदं ॥ चिनुहीदं ॥ चिनुही३ इति ॥ चिनुहीति ॥ उभयत्र विभाषेयं ॥
ईदूदेद्द्विवचनं प्रगृह्यं ॥ ईदूदेदंतं द्विवचनं प्रगृह्यसंज्ञं स्यात् ॥ हरी एतौ ॥ विष्णू इमौ ॥ गंगे अमू ॥ पचेते इमौ ॥ मणीवो
ष्ट्रस्येति तु इवार्थे वशब्दो वाशब्दो वा बोध्यः ॥ अदसो मात् ॥ अस्मात्परावीदूतौ प्रगृह्यौ स्तः ॥ अमी ईशाः ॥ रामकृष्णावमू
आसाते ॥ मात्किं ॥ अमुकेऽत्र ॥ असति मात्ग्रहणे एकारोप्यनुवर्तेत ॥ शे ॥ अयं प्रगृह्यः स्यात् ॥ अस्मे इंद्राबृहस्पती ॥ निपा
त एकाजनाङ् ॥ एकोऽज्निपात आङ्वर्जः प्रगृह्यः स्यात् ॥ इ विस्मये ॥ इ इंद्रः पश्य ॥ उ वितर्के ॥ उ उमेशः ॥ अनाङित्यु
क्ते ङिदाकारः प्रगृह्य एव ॥ आ एवं नु मन्यसे ॥ आ एवं किल तत् ॥ ङित्तु न प्रगृह्यः ॥ ईषदुष्णं ओष्णं ॥ वाक्यस्मरणयोर
ङित् ॥ अन्यत्र ङिदिति विवेकः ॥ ओत् ॥ ओदंतो निपातः प्रगृह्यः स्यात् ॥ अहो ईशाः ॥ संबुद्धौ शाकल्यस्येतावनार्षे ॥ सं
बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ परे ॥ विष्णो इति ॥ विष्णविति ॥ उञः ॥ उञ इतौ वा प्रागुक्तं ॥ उ इति ॥ वि
ति ॥ ऊँ ॥ उञ इतौ दीर्घोऽनुनासिकः प्रगृह्यश्च ऊँ इत्ययमादेशो वा स्यात् ॥ ऊँ इति ॥ विति ॥ मय उञो वो वा ॥ मयः परस्य
उञो वो वा स्यादचि ॥ किम्वुक्तं ॥ किमु उक्तं ॥ वस्यासिद्धत्वान्नानुस्वारः ॥ ईदूतौ च सप्तम्यर्थे ॥ सप्तम्यर्थे पर्यवसन्नमी
दूदंतं प्रगृह्यसंज्ञं स्यात् ॥ सोमो गौरी अधिश्रितः ॥ मामकी तनू इति ॥ सुपां सुलुगिति सप्तम्या लुक् ॥ अर्थग्रहणं किं ॥

ईदृशे क्रियायोगे मर्यादाभिविध्योः [illegible] उपमार्थे [illegible] नियाताः

वा

शिव

(७अ)

वृत्तावर्थांतरोपसंक्रांतिर्माभूत्॥ वाप्याम श्वो वाप्यश्वः॥ अणोऽप्रगृह्यस्यानुनासिकः॥ अप्रगृह्यस्याणोऽवसानेऽनुनासिको वा
स्यात्॥ दधिँ॥ दधि॥ ॥ छ ॥ इति स्वरसंधिः॥ छ ॥ ॥ स्तोः श्चुना श्चुः॥ सकारतवर्गयोः शकारचवर्गाभ्यां योगे श
कारचवर्गौ स्तः॥ हरिश्शेते॥ रामश्चिनोति॥ सच्चित्॥ शार्ङ्गिञ्जय॥ शात्॥ शात्परस्य तवर्गस्य श्चुत्वं न॥ विश्नः॥ प्रश्नः॥
ष्टुना ष्टुः॥ स्तोः ष्टुना योगे ष्टुः स्यात्॥ रामष्षष्ठः॥ रामष्टीकते॥ पेष्टा॥ तट्टीका॥ चक्रिण्ढौकसे॥ न पदान्ताट्टोरनाम्॥ अना
मिति लुप्तषष्ठीकं पदं॥ पदांताट्टवर्गात्परस्यानामः स्तोः ष्टुर्न स्यात्॥ षट् संतः॥ षट् ते॥ पदांतात् किं॥ ईट्टे॥ टोः किं॥ सर्पि
ष्टमं॥ अनाम्नवतिनगरीणामिति वाच्यं॥ षण्णां॥ षण्णवतिः॥ षण्णगर्यः॥ तोः षि॥ तवर्गस्य षकारे परे न ष्टुत्वं॥ स
न्षष्ठः॥ झलां जशोऽन्ते॥ वागीशः॥ चिद्रूपः॥ यरोऽनुनासिकेऽनुनासिको वा॥ यरः पदांतस्यानुनासिके परेऽनुनासिको वा स्या
त्॥ एतन्मुरारिः॥ एतद्मुरारिः॥ स्थानप्रयत्नाभ्यामंतरतमे स्पर्शे चरितार्थो विधिरयं रेफे न प्रवर्तते॥ चतुर्मुखः॥ प्र
त्यये भाषायां नित्यं॥ तन्मात्रं॥ चिन्मयं॥ कथं तर्हि मदोदग्राः ककुद्मंत इति यवादिगणे दकारनिपातनात्॥ तोर्लि॥ तवर्ग
स्य लकारे परे परसवर्णः स्यात्॥ तल्लयः॥ विद्वाँल्लिखति॥ नस्यानुनासिको लः॥ उदः स्थास्तंभोः पूर्वस्य॥ उदः परयोः स्था
स्तंभोः पूर्वसवर्णः स्यात्॥ तस्मादित्युत्तरस्य॥ अलोऽन्त्यस्येति प्राप्ते॥ आदेः परस्य॥ उत्थानं॥ उत्तंभनं॥ अत्राघोषस्य म
हाप्राणस्य सस्य तादृश एव थकारः॥ तस्य झरो झरीति पाक्षिको लोपः॥ लोपाभावपक्षे तु थकारस्य श्रवणं॥ न तु खरि

चेतिचर्त्वं॥ चर्त्वंप्रतिथस्यासिद्धत्वात्॥ झयो होन्यतरस्यां॥ झयः परस्यहस्यपूर्वसवर्णो वास्यात्॥ घोषवतो नादवतो म
हाप्राणस्यसंवृतकंठस्यहस्यतादृशो वर्गचतुर्थएवादेशः॥ वाग्घरिः॥ वाग्हरिः॥ शश्छोटि॥ पदांताज्झयः परस्यशस्य छो
वास्याटि॥ दस्यचुत्वेनजकारे कृते॥ खरि च॥ खरिपरे झलां चरः स्युः॥ इतिजकारस्यचकारः॥ तच्छिवः॥ तच्शिवः॥ छ
त्वममीतिवाच्यं॥ तच्छ्लोकेन॥ अमीतिकिं॥ वाक् श्च्योतति॥ मोनुस्वारः॥ मांतस्यपदस्यानुस्वारः स्याद्धलि॥ हरिंवंदे॥ पद श्च्योतस्य
स्येतिकिं॥ गम्यते॥ नश्चापदांतस्य झलि॥ नस्यमस्यचापदांतस्य झल्यनुस्वारः॥ यशांसि॥ आक्रंस्यते॥ झलि किं॥ म
न्यते॥ अनुस्वारस्य ययि परसवर्णः॥ स्पष्टं॥ अङ्कितः॥ अञ्चितः॥ कुण्ठितः॥ शान्तः॥ गुम्फितः॥ कुर्वन्ति॥ इत्यत्र णत्वेप्रा छ
प्ते तस्यासिद्धत्वादनुस्वारेपरसवर्णे च कृते तस्यासिद्धत्वान्न णत्वं॥ वा पदांतस्य॥ पदांतस्यानुस्वारस्य ययि परे परसव
र्णो वास्यात्॥ त्वङ्करोषि॥ त्वंकरोषि॥ संय्यँता॥ संयंता॥ संव्वँत्सरः॥ संवत्सरः॥ यँल्लोकं॥ यंलोकं॥ अनुस्वारस्य पक्षे अ अत्र
नुनासिकश्चवला॥ मो राजि समः क्वौ॥ क्विबंते राजतौ परे समो मस्यम एव स्यात्॥ सम्राट्॥ हे मपरे वा॥ मपरे हकारे परे
मस्यम एव स्याद्वा॥ ह्मल ह्वल चलने॥ किम्ह्मलयति॥ किंह्मलयति॥ यवलपरे यवला वेति वक्तव्यं॥ यथासंख्यमनुदेशः शिव
समानां॥ समसंबंधी विधिर्यथासंख्यं स्यात्॥ कियँह्यः॥ किंह्यः॥ किव्ँह्वलयति॥ किंह्वलयति॥ किल्ँह्लादयति॥ किं
ह्लादयति॥ नपरे नः॥ नपरे हकारे मस्य नः स्याद्वा॥ किन्ह्नुते॥ किंह्नुते॥ ङ्णोः कुक्टुक् शरि॥ ङकारणकारयोः कुक्टु

(8A)

टुकावागमौ वा स्तः शरि॥ कुक्टुकोरसिद्धत्वाज्जश्त्वं न॥ चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यं॥ पौष्करसादिराचार्यः॥ प्रा
ङ्ख्षष्ठः॥ प्राङ्क्षष्ठः॥ प्राङ्षष्ठः॥ सुगण्ठ्षष्ठः॥ सुगण्ट्षष्ठः॥ सुगण्षष्ठः॥ डः सि धुट्॥ डात्परस्य सस्य धुड्वा स्यात्॥
षट्त्सन्तः षट्सन्तः॥ नश्च॥ नकारान्तात्परस्य सस्य धुड्वा॥ सन्त्सः॥ सन्सः॥ शि तुक्॥ नस्य पदान्तस्य शे परे तुग्वा स्यात्॥ शश्
छोटीति छत्वविकल्पः॥ पक्षे झरो झरीति चकारलोपः॥ सञ्च्छंभुः॥ सञ्च्शंभुः॥ सञ्छंभुः॥ सञ्शंभुः॥ ञछौ ञचछौ ञ
चशौ ञशाविति चतुष्टयं॥ रूपाणामिह तुक् छत्व चलोपानां विकल्पनात्॥ ङमो ह्रस्वादचि ङमुण्नित्यं॥ ह्रस्वात्परो यो ङम्
तदन्तं यत्पदं तस्मात्परस्याचो नित्यं ङमुडागमः स्यात्॥ प्रत्यङ्ङात्मा॥ सुगण्णीशः॥ सन्नच्युतः॥ समः सुटि॥ समो रुः स्यात्सु
टि॥ अत्रानुनासिकः पूर्वस्य तु वा॥ अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात्॥ अनुनासिकात्परोऽनुस्वारः॥
अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः स्यात्॥ खरवसानयोर्विसर्जनीयः॥ विसर्जनीयस्य सः॥ खरि विसर्जनी
यस्य सः स्यात्॥ एतदपवादेन वा शरीति पाक्षिके विसर्गे प्राप्ते॥ संपुंकानां सो वक्तव्यः॥ संस्स्कर्ता॥ संस्कर्ता॥ समो
वा लोपमेके इति भाष्यं॥ लोपस्यापि रुप्रकरणस्थत्वादनुस्वारानुनासिकाभ्यां एकसकारं रूपद्वयं॥ द्विसकारं तु एकमेव॥
स अत्रानचि चेति सकारद्वित्वपक्षे त्रिसकारकं रूपद्वयं॥ अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानामकारोपरि शर्
षु च पाठस्योपसंख्यानात्तेनानुस्वारस्याप्यच्त्वात्॥ अनुनासिकवतां त्रयाणां शरः खयः इति कद्वित्वे षट्॥ अनुस्वारवतां

(९) च

मनुस्वारस्यापि द्वित्वे ह्रादन्ताः॥ एषामष्टादशानां नकारद्वित्वे वचनान्तरेण पुनर्द्वित्वे एकत्वं द्वित्वं त्रित्वमिति चतुःपंचाशत्॥ अणो
नुनासिकत्वे शोत्तरशतं॥ पुमः खय्यम्परे॥ अम्परे खयि पुम्शब्दस्य रुः स्यात्॥ ख्यत्तिपक्षे अप्रत्ययस्येति षत्वपर्युदासात्
≍क≍पयोः प्राप्तौ॥ अख्यत्तिपक्षे तु षत्वप्राप्तौ॥ संपुंकानामिति सः॥ पुं‿स्कोकिलः॥ पुंस्कोकिलः॥ पुं‿स्पुत्रः॥ पुंस्पुत्रः॥
श्रि अम्परे किं पुंक्षीरं॥ खयि किं॥ पुंदासः॥ ख्याञादेशे न॥ पुंख्यानं॥ नश्छव्यप्रशान्॥ अम्परे छवि नान्तस्य पदस्य रुः स्यात्
न तु प्रशान्शब्दस्य॥ विसर्गः॥ सत्वं॥ श्चुत्वं॥ शार्ङ्गिं‿श्छिन्धि॥ शार्ङ्गिंश्छिन्धि॥ चक्रिं‿स्त्रायस्व॥ चक्रिंस्त्रायस्व॥ प
दस्येति किं॥ हंति॥ अम्परे किं॥ सन्त्सरुः॥ खड्गमुष्टिः॥ अप्रशान् किं॥ प्रशांन् तनोति॥ नॄन्पे॥ नॄन् इत्यस्य रुः स्याद्वा पकारे
परे॥ कुप्वोः≍क≍पौ च॥ कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमात् जिह्वामूलीयोपध्मानीयौ स्तः चाद्विसर्गः॥ येन
नाप्राप्तिन्यायेन विसर्जनीयस्य सः इत्यस्यापवादोऽयं न तु शर्परे विसर्जनीय इत्यस्य॥ तेन वासः क्षौमम् इत्यादौ विसर्ग एव॥
नॄ‿≍पाहि॥ नॄं≍पाहि॥ नॄ‿ः पाहि॥ नॄंः पाहि॥ नॄन्पाहि॥ कानाम्रेडिते॥ कान्नकारस्य रुः स्यादाम्रेडिते परे॥ संपुंका
नामिति सः॥ यत्वं॥ कस्कादिषु च॥ एष्विण उत्तरविसर्गस्य षः स्यादन्यस्य तु सः॥ ≍क≍पयोरपवादः॥ कां‿स्कान्॥ कां श्रीव
स्कान्॥ कस्कः॥ कौतस्कुतः॥ सर्पिष्कुण्डिका॥ धनुष्कपालं॥ आकृतिगणोयं॥ संहितायामित्यधिकृत्य॥ छे च॥ ह्रस्व
स्य छे परे तुगागमः स्यात् संहितायां॥ श्चुत्वस्यासिद्धत्वाज्जश्त्वेन दः॥ ननु श्चुत्वस्यासिद्धत्वात् पूर्वं श्चुत्वेन जः॥ तस्य च

(9A)

र्विच्च॥ चर्त्वस्यासिद्धत्वाच्चोः कुरिति कुत्वं न॥ स्वच्छः॥ शिवच्छाया॥ आङ्माङोश्च॥ एतयोश्छे परे तुक् स्यात्॥ पदांताद्वे
ति विकल्पापवादः॥ आच्छादयति॥ माच्छिदत्॥ दीर्घात्॥ दीर्घे छे परे तुक् स्यात्॥ दीर्घस्यायं तुक् न तु छस्य॥ सेनाच्छा
च्छायेति ज्ञापकात्॥ चेच्छिद्यते॥ पदांताद्वा॥ दीर्घात्पदांतात् छे परे तुग्वा स्यात्॥ लक्ष्मीच्छाया॥ लक्ष्मीछाया॥ ॥
छ्रू॥ इति हल्संधिः॥ छ्रू॥ ॥विसर्जनीयस्य सः॥ विष्णुस्त्राता॥ शर्परे विसर्जनीयः॥ शर्परे खरि विसर्जनीयस्य विस
र्जनीयो न त्वन्यत्॥ कस्त्सरुः॥ घनाघनः क्षोभणः॥ इह यथायथं सत्वं जिह्वामूलीयश्च न॥ वा शरि॥ शरि परे विसर्जनीय
स्य विसर्जनीय एव वा स्यात्॥ हरिः शेते॥ हरिश्शेते॥ खर्परे शरि वा विसर्गलोपो वक्तव्यः॥ रामस्थाता॥ हरिस्फुर
ति॥ पक्षे विसर्गे सत्वे च त्रैरूप्यं॥ कुप्वोः ≍क≍पौ च॥ कः करोति॥ क≍करोति॥ कः खनति॥ क≍खनति॥ कः पठति॥ क≍
पठति॥ सोपदादौ॥ विसर्जनीयस्य सः स्यादपदाद्योः कुप्वोः परयोः॥ पयस्पाशं॥ पयस्कल्पं॥ पयस्कं॥ पयस्काम्यति॥
अनव्ययस्येति वाच्यं॥ प्रातःकल्पं॥ काम्ये रोरेवेति वाच्यं॥ नेह॥ गीःकाम्यति॥ इणः षः॥ इणः परस्य विसर्गस्य षः स्यात्पू
र्वविषये॥ सर्पिष्पाशं॥ सर्पिष्कल्पं॥ सर्पिष्कं॥ सर्पिष्काम्यति॥ नमस्पुरसोर्गत्योः॥ गतिसंज्ञयोर्विसर्गस्य सः स्यात्कु रनयो
प्वोः परयोः॥ नमस्करोति॥ साक्षात्प्रभृतित्वात्कृञो योगे विभाषा गतिसंज्ञा॥ तदभावे नमः करोति॥ पुरोऽव्ययमिति
नित्यं गतिसंज्ञा॥ पुरस्करोति॥ अगतित्वान्नेह॥ पूः॥ पुरौ॥ पुरः प्रष्टव्याः॥ इदुदुपधस्य चाप्रत्ययस्य॥ इकारोकारोपधस्य

(१०)

स्यचाप्रत्ययस्यविसर्गस्यषःस्यात्कुप्वोःपरयोः॥निष्प्रत्यूहं॥आविष्कृतं॥दुष्कृतं॥अप्रत्ययस्येतिकिं॥अग्निःकरोति॥वायुःकरो
ति॥एकादेशशास्त्रनिमित्तकस्यनषत्वं॥कस्कादिषुभ्रातुष्पुत्रशब्दस्यपाठात्॥तेनेहन॥मातुःकृपा॥मुहुसःप्रतिषेधः॥मुहुः
कामा॥तिरसोऽन्यतरस्यां॥सोवास्यात्कुप्वोःपरयोः॥तिरस्कर्ता॥तिरःकर्ता॥द्विस्त्रिश्चतुरितिकृत्वोर्थे॥कृत्वोर्थेवर्त्तमानाना
मेषांविसर्गस्यषकारोवास्यात्कुप्वोःपरयोः॥द्विष्करोति॥द्विःकरोति॥इत्यादि॥कृत्वोर्थेकिं॥चतुष्कपालः॥इसुसोःसामर्थ्ये॥ए
तयोर्विसर्गस्यषःस्याद्वाकुप्वोःपरयोः॥सर्पिष्करोति॥सर्पिःकरोति॥धनुष्करोति॥धनुःकरोति॥सामर्थ्यमिहव्यपेक्षा॥सामर्थ्ये
किं॥तिष्ठतुसर्पिःपिबत्वमुदकं॥नित्यंसमासेऽनुत्तरपदस्थस्य॥इसुसोर्विसर्गस्यानुत्तरपदस्थस्यसमासेनित्यंषःस्यात्कुप्वोःपरयोः
सर्पिष्कुण्डिका॥धनुष्कपालं॥अनुत्तरपदस्थस्यकिं॥परमसर्पिःकुण्डिका॥कस्कादिषुसर्पिष्कुण्डिकाशब्दोऽसमासेव्यपेक्षाविरहेऽपिष
त्वार्थः॥व्यपेक्षायांनित्यार्थश्च॥अतःकृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य॥अकारादुत्तरस्यानव्ययस्यविसर्गस्यसका
रादेशःस्यात्समासेकरोत्यादिषुपरेषुनतूत्तरपदस्थस्य॥अयस्कारः॥अयस्कंसः॥अयस्कुम्भः॥अयस्पात्रं॥अयःसहिता शिव
कुशा॥अयस्कुशा॥अयस्कर्णी॥अतःकिं॥गीःकारः॥अनव्ययस्येतिकिं॥स्वःकामः॥समासेकिं॥यशःकरोति॥अनुत्तरप
दस्थस्येतिकिं॥परमयशःकारः॥अधःशिरसीपदे॥एतयोर्विसर्गस्यसादेशःस्यात्पदशब्देपरे॥अधस्पदं॥शिरस्पदं॥स
मासइत्येव॥नेह॥अधःपदं॥शिरःपदं॥अनुत्तरपदस्थस्येत्येव॥परमशिरःपदं॥कस्कादिषुच॥भास्करः॥ ॥ॐ॥इतिविसर्गसंधिः॥ॐ॥ ॥

॥अयस्कामः॥४

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com